# SSLC MODEL EXAMINATION, FEBRUARY - 2023
## SANSKRIT
First Language - (Academic & Oriental) Paper I

Time : 1½ Hours
Total Score : 40

**छात्राणां कृते सामान्यनिर्देशाः -**

- 15 निमेषाः समाश्वासकालः कालोऽयं प्रश्नानां वाचनाय उत्तराणाम् आसूत्रणाय च उपयोक्तव्यः।
- प्रश्नान् प्रश्ननिर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

Score

**1. चतुर्णां समुचितमुत्तरं कोष्ठकात् चित्वा लिखत।** **4x1=4**

(क) भारविना विरचितं महाकाव्यं किम् ?

(रघुवंशम्, नैषधम्, किरातार्जुनीयम्, माघम्)

(ख) सर्वेषु अपत्येषु तुल्यवत्सला का ?

(कमला, कामधेनुः, सुरभिः, जननी)

(ग) सामजवरगमना....कीर्तनमिदं कस्मिन् रागे निबद्धं भवति ?

(हिन्दोलरागे, श्रीरागे, कल्याणीरागे, मोहनरागे)

(घ) मुरभित्कुटुम्बिनी का ?

(सरस्वती, लक्ष्मीः, सुरभिः, द्विजपत्नी)

(ङ) उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत-वाक्यमिदं कस्यामुपनिषदि विद्यते ?

(छान्दोग्योपनिषदि, केनोपनिषदि, कठोपनिषदि, माण्डूक्योपनिषदि)

(च) शकुन्तलायाः प्रियसखी का ?

(द्रौपदी, दमयन्ती, अनसूया, सीता)

Score

**2. यथोचितं पट्टिकां पूरयत।** 4x1=4

| | कृतिः | कर्ता | विभागः |
|---|---|---|---|
| उदा | वृक्षायुर्वेदः | सुरपालः | शास्त्रग्रन्थः |
| | सत्यशोधनम् | __________ | आत्मकथा |
| | अभिज्ञानशाकुन्तलम् | कालिदासः | __________ |
| | __________ | माधवविद्यारण्यस्वामी | महाकाव्यम् |
| | __________ | शङ्कराचार्यः | स्तोत्रकाव्यम् |

**3. उदाहरणानुसारं पदच्छेदं लिखत।** 1x1=1

उदा – शिवास्ते-शिवाः+ते।

निरतास्ते - __________+__________ ।

**4. अधोदत्तवाक्यात् संबोधनपदं चित्वा लिखत।** 1x1=1

गच्छ वत्से ! सर्वं भद्रं जायेत।

**5. उदाहरणानुसारं विग्रहवाक्यं लिखत।** 1x1=1

उदा – मम वचनात् – मद्वचनात्।

मम वाक्यात् – __________ ।

**6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत।** 4x2=8

6. सूचनानुसारं गद्यक्रमं लिखत।

उत्तिष्ठत जाग्रत

प्राप्य वरान्निबोधत।

क्षुरस्य धारा निशिता दुरत्यया

दुर्गं पथस्तत्कवयो वदन्ति।।

(सूचना : उत्तिष्ठत.....वरान्.....निबोधत.....क्षुरस्य.....तत्पथः.....वदन्ति।)

Score

7. उदाहरणानुसारं पट्टिकां पूरयत।

| | लट् | लोट् |
|---|---|---|
| उदा | पश्यति | पश्यतु |
| | गच्छति | ________ |
| | ________ | भवतु |

8. उदाहरणानुसारं यद्यपि-तथापि उपयुज्य वाक्यं परिवर्तयत।

उदा : वृक्षे अनेकानि फलानि सन्ति। कानिचित् उपयोग्यशून्यानि भवन्ति।

यद्यपि वृक्षे अनेकानि फलानि सन्ति तथापि कानिचित् उपयोग्यशून्यानि भवन्ति।

पितामहः सम्पूर्णम् औषधम् अपिबत्। रोगशमनं नाभवत्।

9. अधोदत्तं वाक्यं पठित्वा क्त्वान्तं तुमुन्नन्तं च चित्वा लिखत।

कवाटं बद्ध्वा ईश्वरप्रार्थनां कर्तुं येशुदेवः शिष्यान् उपादिशत्।

क्त्वान्तम् - - - - - ।

तुमुन्नन्तम् - - - - - ।

10. अधोदत्तं वाक्यं पठित्वा शत्रन्तं शानजन्तं च चित्वा लिखत।

आकाशे डयमानः गरुडः भक्षणम् इच्छन् भूमौ आगच्छत्।

11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत। 2x4=8

11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

आत्मानमपि मन्येत

कर्तारं सुखदुःखयोः।

तस्माच्छ्रेयस्करं मार्गं

प्रतिपद्येत न त्रसेत्।।

(क) सुखदुःखयोः कर्ता कः ?

(ख) तस्मात् कीदृशं मार्गं प्रतिपद्येत ?

(ग) श्लोकात् एकं क्रियापदं चित्वा लिखत ?

(घ) पन्थानम् इत्यर्थे श्लोके प्रयुक्तं पदं किम् ?

Score

12. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

अतिप्रशस्तेषु संस्कृतमहाकाव्येषु अन्यतमं भवति श्रीहर्षेण विरचितं नैषधीयचरितम्।

विद्वदौषधम् इति कीर्तिते महाकाव्येऽस्मिन् नलः नायकः दमयन्ती नायिका च भवतः। एकविंशतिसर्गयुक्ते नैषधे नलदमयन्त्योः प्रणयकथा अतिप्राधान्येन वर्ण्यते।

(क) नैषधीयचरितं केन विरचितं महाकाव्यं भवति ?

(ख) नैषधीयचरिते नायिका का ?

(ग) नैषधीयचरिते कति सर्गाः सन्ति ?

(घ) नैषधीयचरिते प्राधान्येन किं वर्ण्यते ?

13. संभाषणांशान् पूरयत।

विवेक : - ______ प्रकाश ! कुत्र गच्छति ?

प्रकाश : - नमस्ते। विवेक ! अहं ______ गच्छामि।

विवेक : - भवान् किमर्थं सभागृहं गच्छति ?

प्रकाश : - सभागृहं ______ बोधोत्पादनाय कक्ष्या वर्तते ?

विवेक : - उन्मादकवस्तुनिवारणे बोधोत्पादनाय कः कक्ष्यां चालयति ?

प्रकाश : - तदर्थं मन्त्रिवर्यः आगमिष्यति।

विवेक : - भवान् अत्र तिष्ठतु। मातरम् उक्त्वा अहं ______ आगच्छामि।

प्रकाश : - शीघ्रम् आगच्छतु। अहमत्र तिष्ठामि।

विवेक : - धन्यवादः।

14. प्रादेशिकभाषया विवर्तयत। 1x5=5

2022 तमे वर्षे विश्वपादकन्दुकक्रीडामत्सरः खत्तर् राष्ट्रे समाप्ता। चतुर्वर्षाभ्यन्तरे अयं मत्सरः प्रचलति। 1930 तमे वर्षे विश्वपादकन्दुकक्रीडामत्सरः प्रथमतया आरब्धोऽभवत्। अस्मिन् वर्षे उद्घाटनमत्सरः 'अल्वैत्' क्रीडाङ्कणे प्रचलितोऽभवत्। सामान्यजनानामपि इष्टतमः मत्सरः भवति पादकन्दुकक्रीडा।

15-17 प्रश्नेभ्यः द्वयोः उत्तरे लिखत। 2x4=8

15. सूचनाः उपयुज्य सङ्गीतज्ञं त्यागराजम् अधिकृत्य टिप्पणीं लिखत।

(सूचनाः भारतं - बहवः सङ्गीतज्ञाः - त्यागराजः - तञ्चावूर् - तिरुवय्यार् - उञ्छवृत्तिः वाग्गेयकारः - सङ्गीतोपासकः - पञ्चरत्नकीर्तनानि - सङ्गीताय योगदानम्।)

Score

16. जीवनचरितं पठित्वा रूपरेखां लिखत।

चलच्चित्रमण्डले प्रसिद्धः गायकः भवति एस्.पि. बालसुब्रह्मण्यः। 1946 तमे वर्षे जूण् 4 दिनाङ्के तमिल्नाट् देशे जनिमलभत। गायकः, नटः, संगीतसंविधायकः, चलच्चित्रनिर्माता, इत्यादिषु बहुषु विभागेषु तस्य प्रवृत्तिमण्डलः विपुलः भवति। पद्मश्रीः, पद्मभूषणम्, पद्मविभूषणम् इत्यादिभिः बहुभिः पुरस्कारैः सः राष्ट्रेण सम्मानितोऽभवत्। 2020 तमे वर्षे सेप्तम्बर् 25 दिनाङ्के तस्य देहवियोगोऽभवत्।

**नाम** -

**जन्म** -

**प्रवृत्तिमण्डलम्** -

**पुरस्काराः** -

**देहवियोगः** -

17. सूचनाः उपयुज्य ईशोपदेशसारम् अधिकृत्य टिप्पणीं लिखत।

(सूचनाः - प्रोफ. पि.सी. देवस्या - क्रिस्तुदेवस्य सम्पूर्णं जीवनचरितम् - येशुदेवस्य उपदेशाः - गिरिप्रभाषणम् - जनतासमक्षं प्रार्थना - कपटभक्ताः - एकान्ते प्रार्थना - पिता दास्यति - दानस्वभावः)

-oOo-